# ९. मनुजधर्माः

तृतीयः भागः

## पठन्तु, विचिन्त्य वदन्तु

(शिवः तस्य पितामहः द्वावपि मिलित्वा मार्गे गच्छतः । ताभ्यां वृद्धाश्रमः इति सूचनाफलकम् दृष्टम् ।

शिवः - पितामह ! सूचनाफलके किं लिखितम् अस्ति ?

पितामहः - प्रियपौत्र ! 'वृद्धाश्रमः' इति ।

शिवः - वृद्धाश्रमः इत्यस्य अर्थः कः पितामह ?

पितामहः - वृद्धाश्रमः नाम आधाररहितानां वृद्धानां निवासस्थानम् ?

शिवः - किमर्थं पितामह ! तान् तेषां पुत्राः न पोषयन्ति किम् ?

पितामहः - न हि प्रियपौत्र ! "महतीं प्रगतिं प्राप्नोत्" इति कथ्यमाने आधुनिकयुगे मातापित्रोः पोषणार्थं रक्षणार्थञ्च तेषां पुत्राणां समयः एव न लभ्यते । मानवसम्बन्धेषु आधुनिकानाम् ईषदपि रुचिः नास्ति । तेन कारणेनैव वृद्धाश्रमाः, अनाथशरणालयाः इत्यादयः उद्भवन्ति ।

शिवः - अहं तु मम मातापितरौ सम्यक् पालयामि ।

पितामहः - अस्तु ।

**प्रश्नाः ?**

1. उपरितनं सम्भाषणं कयोर्मध्ये प्रचलितम् ?
2. सम्भाषणे शिवः तस्य पितामहः किमुद्दिश्य सम्भाषणं कुरुतः?
3. मानवसम्बन्धाः नाम के ?
4. वृद्धाश्रमाणाम् आवश्यकता कदा न भवति ?

**उद्देश्यम्**

★ आधुनिकसमाजे मानवीयमूल्यानाम् आवश्यकतायाः अनुभावनम् ।

★ जीवने, समाजे, परिवारे, पितापुत्रसोदरपतिपत्न्यादिसम्बन्धानां विषये अभिबोधनम् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।

© SCERT not to be republished

1. जनो न जानाति हि पुत्रदोषान् गुणांश्च तस्मिन्नसतोऽपि पश्येत् ।
पापं तदर्थं बहुधा करोति बली हि लोके सुतमूलमोहः ॥

2. परम्परा प्रापितधर्मसक्तान् यूनो वितन्वन्ति गृहेषु वृद्धाः ।
सत्सम्प्रदायी जनयेदिहान्यं दीपं विना दीपभवः कथं स्यात् ॥

* 3. पुत्रेषु रागो हि निसर्गजातः पित्रादिभक्तिः खलु यत्नसाध्या ।
नीचैर्गतिस्सा सहजा जलस्य यत्नेन साध्योर्ध्वगतिस्तु तस्य ॥

4. सद्यस्सुखं स्वल्पमघेन लभ्यं महत्सुखं भावि च पुण्यकार्यैः।
जनस्सुखार्थी तु करोति पापं ततोऽपि चित्रं किमिहास्ति लोके ॥

* 5. जिह्वायां संस्कृतं यस्य हृद्यास्तिक्यमकुण्ठितम् ।
वेदशास्त्रविचारश्च मानसे स हि भाग्यवान् ॥

6. स्वर्णस्य शुद्धिर्ननु सप्तजिह्वे वाञ्छाविशुद्धिश्च हि शास्त्ररीत्याम् ।
सत्पात्र एवार्जितवित्तशुद्धिः पापात्मशुद्धिः खलु साधुसङ्गे ॥

7. अस्त्वक्षरा कीर्तिरपेक्षणीया तथापि शोच्यं खलु पश्य लोके ।
वृत्तान्तपत्राक्षरकीर्तिमेके मन्यन्त एवाक्षरकीर्तिमद्य ॥

©SCERT not to be republished



* 8. व्यर्था सभा शिष्टजनैर्विहीना दयाविहीनं हृदयं तथैव ।
विशालहर्म्यं च विनाऽतिथीन्हि वृथेशभक्त्या खलु जन्म शून्यम् ॥

* 9. यत्रास्ति देशे धनिनां न गर्वो न मानहानिश्च दरिद्रकस्य ।
तत्रास्ति सम्पत् खलु पश्य दैवी धनी दरिद्रं मनुते पवित्रम् ॥

10. योग्ये सुते किं धनसञ्चयेनाऽयोग्ये सुते किं धनसञ्चयेन ।
योग्यः स्वयं जीवति पौरुषेणाऽयोग्यः पुनर्नाशयति प्रदत्तम् ॥

## सारांशः

1. लोके पुत्रमोही जनः स्वपुत्रगतदोषान् न कदापि जानाति । किन्तु पुत्रे अविद्यमानान् गुणानेव सदा पश्यति । पुत्रार्थम् अनेकविधं पापं करोति । पुत्रमोहः लोके बलवान् प्रमादकारी खलु !
2. दीपात् एव यथा दीपः ज्वलति तथा गृहेषु वृद्धाः स्वधर्मान् परम्परया युवकान् प्रापयन्ति । एवं सज्ञनः अन्यं सज्ञनं करोति । एषः एव सत्सम्प्रदायः ।
3. यथा जलस्य निम्नगतिः स्वभावजा भवति । किन्तु प्रयत्नेन जलम् ऊर्ध्वं गमयितुं शक्नुमः । एवमेव पितॄणां पुत्रेषु अनुरागः यद्यपि स्वभावसिद्धः तथापि पुत्रस्य पित्रादिषु अनुरागः यत्नतः साधनीयः भवति ।
4. अल्पसुखं तु पापाचरणेन सद्यः लभ्यते । महत्सुखं तु पुण्याचरणं विना न भवति । तथापि सुखार्थी मानवः पापमेव आचरति । महत्सुखाय न यतते इति आश्चर्यम् ।
5. यः संस्कृतेन सम्भाषणं कर्तुं शक्नोति, मनसि अकुण्ठिताम् आस्तिक्यबुद्धिं धत्ते, वेदशास्त्राणाम् अर्थविचारणं करोति स एव भाग्यवान् भवति ।
6. यथा हेम्नः अग्नौ शुद्धिः भवति, मनोरथानां शुद्धिः शास्त्रपद्धतौ भवति, आर्जितवित्तस्य सत्पात्रदाने शुद्धिः भवति, तथा पापात्मनां जनानां शुद्धिः सत्पुरुषसङ्गे भवति ।
7. येन केनापि वा स्थिरा (अक्षरा) कीर्तिः अपेक्षणीया भवति तदस्तु । किन्तु अद्य लोके इदं शोभनीयमस्ति यत् केचन केवलवार्तापत्रिकासु विज्ञापनमात्रेण कीर्तेरक्षरत्वं न सिद्ध्यति । तच्च तत्कृतप्रयत्नमहत्तां लक्ष्यीकृत्यैव सिद्ध्यति ।
8. सज्ञनैः रहिता सभा व्यर्था भवति । एवं दयारहितं हृदयमपि न शोभते । अतिथिजनरहितं विशालमपि भवनं व्यर्थं भवति । एवमेव भक्तिहीनं जन्म शून्यमेव भवति ।
9. यस्मिन् देशे धनिकाः गर्वरहिताः भवन्ति । दरिद्राणामपि गौरवभङ्गो न भवति, तस्मिन् देशे दैवीसम्पद् अस्तीति ज्ञायते । अस्मिन् देशे धनी एवं दरिद्रः परस्परम् आदरणीयं मनुते ।
10. यदि योग्यः पुत्रः अस्ति चेत् धनसम्पादनं किमर्थम् ? अयोग्यः पुत्रः अस्ति चेदपि धनसम्पादनं व्यर्थमेव । योग्यः पुत्रः पौरुषेण स्वयं जीवति । पित्रार्जितं न काङ्क्षति । अयोग्यः पित्रार्जितं भूरि दत्तमपि नाशयति । अर्थात् पुत्राः योग्याः कर्तव्याः इत्यर्थः ।

© SCERT not to be republished

## कविपरिचयः

एते श्लोकाः श्री जटावल्लभुलपुरुषोत्तममहोदयैः रचितात् चित्रशतकात् गृहीताः । एते संस्कृतान्ध्राङ्ग्लभाषासु पण्डिताः कवयश्च । ''आर्षविद्याभूषण'' ''कलाप्रपूर्ण'' इत्यादिपुरस्कारैः, बिरुदैः सभाजिताः। एते महाभागाः कोव्वूरुपत्तनस्य आन्ध्रगीर्वाणविद्यापीठसंस्कृतकलाशालायाः प्रधानाचार्यत्वेन आसन् । अधुना तेषामभावेऽपि तदीयं यशस्तनुः सर्वेषां भारतीयानां संस्कृतान्ध्रविदुषां हृदयेषु विराजते ।

# एतानि कुर्वन्तु

## I भावावगाहनम् - प्रतिस्पन्दनम्

### अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।

१. पूर्वकाले स्थितान् पारिवारिकसम्बन्धान् उद्दिश्य वदन्तु ।

२. अधुना विद्यमानां कुटुम्बव्यवस्थाम् उद्दिश्य वदन्तु ।

३. प्राचीनकालिकानां वर्तमानकालिकानां च मानवसम्बन्धानां मध्ये कीदृशं परिवर्तनं जातम् इति विषयमुद्दिश्य चर्चां कुर्वन्तु ।

### आ. अधः दत्तानि पदानि कस्मिन् श्लोके सन्ति इति ज्ञात्वा श्लोकसङ्ख्यां लिखन्तु ।

| | | |
|---|---|---|
| १. परम्परा | २. सत्सम्प्रदायी | ३. पुण्यकामः |
| ४. भाग्यवान् | ५. सप्तजिह्वः | ६. वाञ्छाविशुद्धिः |
| ७. साधुसङ्गः | ८. विशालहर्म्यं | ९. धनसञ्चयनम् |
| १०. प्रदत्तम् | | |

### इ. अधः दत्तानि वाक्यानि पठन्तु । पाठस्य आधारेण दोषान् परिहरन्तु ।

**उदा :** पुत्रार्थम् अनेकविधं पापं न करोति । - पुत्रार्थम् अनेकविधं पापं करोति ।

१. दीपात् यथा दीपः ज्वलयामि ।

२. जलस्य ऊर्ध्वगतिः स्वभावजा भवति ।

३. सद्यस्सुखं स्वल्पधनेन न लभ्यम् ।

४. योग्यः पुत्रः अस्ति चेत् धनसम्पादनम् आवश्यकम् ।

५. सज्जनैः रहिता सभा सफला भवति ।

©SCERT not to be republished

ई. श्लोकं पठित्वा प्रश्नानां समाधानाति लिखन्तु ।

**रात्रिर्गमिष्यति भविष्यति सुप्रभातं**
**भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।**
**इत्थं विचिन्तयति कोशगते द्विरेफे**
**हा हन्त ! हन्त ! नलिनीं गज उज्जहार ॥**

१. द्विरेफस्य अर्थः कः?
२. द्विरेफः कुत्र अस्ति?
३. कोशगतः द्विरेफः किं चिन्तयति?
४. अस्य श्लोकस्य शीर्षिकां सूचयन्तु ।

उ. पाठं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

१. दैवी संपद् कुत्र अस्ति ?
२. पापी शुद्धः कथं भवति ?
३. लोके पुत्रव्यामोहात् हानयः काः ?
४. भक्तिविहीनं जन्म कीदृशं भवति ?
५. जलस्य स्वभावः कीदृशः ?

## II.भावव्यक्तीकरणम् - सर्जनात्मकता

अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. आधुनिककाले पितापुत्रसम्बन्धः कीदृशः वर्तते ।
२. संसर्गेण गुणाः दोषाश्च भवन्ति । अस्मिन् विषये भवतां अभिप्रायः कः ?
३. पुरुषः विद्यया धनेन वा सुखितः भवतीति अंशं विचिन्त्य लिखन्तु ।
४. मातापित्रोः संरक्षणविषये भवन्तः किं कुर्वन्तीति लिखन्तु ।

आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. कुटुम्बे स्थितानां वृद्धानां प्रामुख्यं विवृण्वन्तु ।
२. परिवारसंरक्षणविषये ज्योष्ठानां दायित्वं लिखन्तु ।

इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१.''समष्टिजीवनं सन्तोषदायकम् - व्यष्टिजीवनं दुःखदायकम्'' एतादृशानि अन्यानि घोषणवाक्यानि लिखन्तु ।

© SCERT not to be republished

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఆరు ఋతువులు మనిషి జీవితంలోని వివిధదశలను ప్రతిబింబిస్తాయి. మనిషిలో కలిగే రసానుభూతులకు, ప్రకృతిలోని మార్పులకు విడదీయరాని సంబంధం ఉంది. వెన్నెల రాత్రులు, హేమంత సమయాలు, తొలకరి జల్లులు మనిషిలోని హృదయస్పందనలకు అద్దం పడతాయి.

**उ. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।**

आधुनिकसुभाषितरचनायां कवेः शैली कीदृशीति वदन्तु ।

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

**अ. अधः दत्तानि रिक्तस्थानानि पाठस्य आधारेण पूरयन्तु । तैः पदैः नूतनवाक्यानि लिखन्तु ।**

१. पुत्रेषु रागो हि ............. ।

२. जनस्सुखार्थी तु ............... पापम् ।

३. ............ संस्कृतं यस्य ।

४. व्यर्था सभा ................ विहीना ।

**आ. अधः लिखितानां पदानां समानार्थकपदानि पाठ्यांशात् ज्ञात्वा लिखन्तु । तैः पदैः नूतनवाक्यानि लिखन्तु ।**

**उदा- सुतः - पुत्रः**

तोयम्

रसना

धनम्

हेम

**इ. अधः निर्दिष्टानां पदानां विरुद्धार्थकपदानि अभिज्ञाय तानि उपयुज्य वाक्यानि लिखन्तु ।**

**उदा -** स्वल्पः × अधिकः

- दानं स्वल्पं भवति चेदपि तेन पुण्यं अधिकं भवति ।

१. नीचः ×    २. सुखम् ×

३. पापम् ×    ४. धनी ×



©SCERT not to be republished

## 2. व्याकरणांशाः

### अ. सन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु ।

गुणान् + च

असतः + अपि

अस्तु + अक्षराः

रागः + हि

तथा + अपि

### आ. विसन्धिं कुर्वन्तु - सन्धिनाम निर्दिशन्तु ।

हृद्यास्तिक्यम्

वृथेशभक्त्या

यत्रास्ति

सुखार्थी

ततोऽपि

### इ. अधः दत्तं वाक्यं पठन्तु, अवगच्छन्तु ।

**कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्षितम् ।**

अत्र 'उत्तरङ्गाक्षैः = अतिचञ्चललोचनैः स्तब्धकर्णैः = अचाञ्चल्यकर्णैः मृगैः वीक्षितम्' इति मृगाणां स्वभाववर्णनं भवति ।

© SCERT not to be republished

**विवरणम्** - **यत्र जातिक्रियागुणादिसम्बन्धिनः स्वभावस्य यथार्थतयाः वर्णनं 'स्वभावोक्त्यलङ्कारः' भवति ।**

**लक्षणम्** - **स्वभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम् ।**

### ई. अधः दत्तान् प्रश्नान् आधारीकृत्य दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

**आकाशे विहङ्गाः वर्तुलाकारेण डयन्ते ।**

१. आकाशे के डयन्ते ?

२. विहङ्गाः कुत्र डयन्ते ?

३. आकाशे विहङ्गानां डयनं कीदृशम् ?

४. अयं कः अलङ्कारः ?

५. स्वभावोक्त्यलङ्कारे के के अंशाः विद्यन्ते ?

उ. अधः दत्तयोः वाक्ययोः अलङ्कारनिरूपणं कुर्वन्तु ।

१. तिरुमलक्षेत्रे स्वर्णालङ्कृतम् आनन्दनिलयगोपुरं स्वकान्त्या भक्तजनान् नितराम् आनन्दयति ।

२. मातुः अङ्के शिशुः सुखेन शेते ।

**परियोजनाकार्यम्**

आधुनिकसमाजे लुप्यमानमानवसम्बन्धान् नैतिकमूल्यानि च उद्दिश्य कानिचन ध्येयवाक्यानि विलिख्य भित्तिपत्रिकायां लेपयन्तु ।

© SCERT not to be republished

## विषयविस्तरः

### श्रीमन्महाभारते पर्वाणि

भगवान् वेदव्यासः श्रीमन्महाभारतं रचितवान् । महाभारते अष्टादशपर्वाणि सन्ति । कथाभागस्य नाम पर्व इत्युच्यते । तानि यथा -

| | | | |
|---|---|---|---|
| १. अदिपर्व | २. सभापर्व | ३. अरण्यपर्व | ४. विराटपर्व |
| ५. उद्योगपर्व | ६. भीष्मपर्व | ७. द्रोणपर्व | ८. कर्णपर्व |
| ९. शल्यपर्व | १०. सौप्तिकपर्व | ११. स्त्रीपर्व | १२. शान्तिपर्व |
| १३. अनुशासनिकपर्व | १४. अश्वमेधपर्व | १५. आश्रमवासपर्व | १६. मौसलपर्व |
| १७. महाप्रस्थानपर्व | १८. स्वर्गारोहणपर्व | | |

अस्मिन् महाभारते लक्षश्लोकाः सन्ति ।

“**भारतं पञ्चमो वेदः**” इति प्रशास्तिः ।

महत्वात् भारत्वात् च महाभारतम् इत्युच्यते ।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**